# संस्कृतवार्ता:

दिनाङ्क : 03.09.2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

- अद्य नवदेहली-नगरे जी. एस्. टी. परिषदः षट्पञ्चाशतमम् सम्मेलनम् आरभत। भारतस्य भविष्यम् अभिलक्ष्य जी. एस्. टी.-परिष्कारेषु विचारणा भविष्यति इति अपेक्ष्यते ।
- सेमीकॉन-इण्डिया-सम्मेलनस्य द्वितीये दिने प्रधानमन्त्रिणा नरेन्द्र-मोदिना अद्य नव-दिल्ल्याः यशोभूमौ सेमिकण्डक्टर-क्षेत्रस्य विशेषज्ञैः सह संवादः कृतः ।
- विदेश-मन्त्री डा. एस्. जयशङ्करः तथा च जर्मनी-देशस्य विदेशमन्त्री जोहान् डेविड् वाडेफुल् अद्य नवदेहली-नगरे भारत-जर्मनी-सहयोगिता विषये, यूरोपीय-सङ्घेन सह सम्बन्धानां विषये च सफलां चर्चां कृतवन्तौ।
- भारतीय-ऋतु-विज्ञान-विभागेन हिमाचल-जम्मूकश्मीर-पञ्जाब-हरियाणासु च अतिवृष्टेः पूर्वानुमानम् अभिलक्ष्य रेड अलर्ट इति संचेतना प्रकटिता ।
- हॉकी-प्रतिस्पर्धायां भारतम् अद्य बिहारराज्यस्य राजगीर-नगरे पुरुष-एशिया-कप-प्रतियोगितायाः स्पर्धायां दक्षिण कोरिया-देशेन सह स्पर्धिष्यते।

------------------------------------------

जी. एस्. टी. परिषदः सम्मेलनम्

अद्य नवदेहली-नगरे जी. एस्. टी. परिषदः षट्पञ्चाशतमम् सम्मेलनम् आरभत। केन्द्रीय-वित्त-मन्त्री निर्मला सीतारामनः द्विदिवसीय-सम्मेलनस्य अस्य अध्यक्षतां करोति। भारतस्य भविष्यतः जी. एस्. टी.-परिष्कारेषु विचारणा भविष्यति इति अपेक्ष्यते, यत्र कर-मानानां तर्कसङ्गतीकरणं, अनुपालनं सरलीकरणं च विद्यते। केन्द्रीय-वित्त-राज्यमन्त्री पङ्कज् चौधरी, दिल्ली, गोवा, हरियाणा, जम्मू-कश्मीर, मेघालय, ओडिशा-राज्यानां मुख्यमन्त्रिणः अस्मिन्

सभायां उपस्थिताः सन्ति। अरुणाचलप्रदेशस्य, बिहारस्य, मध्यप्रदेशस्य, तेलङ्गाना-राज्यस्य च उपमुख्यमन्त्रिणः, मणिपुरस्य राज्यपालः, अनेकेषां राज्यानां केन्द्रशासितप्रदेशानां च वित्तमन्त्रिणः अपि अस्मिन् सभायां भागं गृह्णन्ति।

वार्ताहरैः सह वार्तालापं कुर्वन् आन्ध्रप्रदेशस्य वित्तमन्त्री पी केशवः अवदत् यत् तस्य दलं केन्द्रसर्वकारेण प्रास्तावितानां जी. एस्. टी. क्षेत्रस्य प्रमुखानां परिष्काराणां समर्थनं करिष्यति इति। सः अवदत् यत्, अधिकांशाः संस्काराः सामान्यजनस्य, निर्धनतमानां च साहाय्यं करिष्यन्ति इति। श्री केशवः अवदत् यत् संस्काराः देशस्य अर्थव्यवस्थायाः अपि विस्तारं करिष्यन्ति इति।

प्रधानमन्त्री नरेन्द्रमोदी, गतमासे स्वस्वतन्त्रतादिनोत्सवस्य भाषणे, वस्तु-सेवा-करः कथं राष्ट्राय लाभप्रदः भवेत् इति अस्मिन् विषये अवधानं दत्तवान्। श्री मोदी जी. एस्. टी. इत्यस्य अन्तर्गतं भाविनां परिष्काराणाम् महत्त्वं अधोरेखितवान्, येन सामान्यजनाः, कृषकाः, मध्यमवर्गः, एम्. एस्. एम्. ई. इत्येतेभ्यः लाभः भविष्यति। आवश्यकवस्तूनां करस्य न्यूनीकरणं, स्थानीयविक्रेतृभ्यः उपभोक्तृभ्यः च आश्वस्तिं च प्रदातुं, दीपावलि-दिने जी. एस्. टी.-परिष्काराः क्रियान्विताः भविष्यन्ति।

आत्मनिर्भरभारतस्य निर्माणार्थं केन्द्रसर्वकारेण गतमासे मिलितस्य मन्त्रि-समूहस्य कृते जी. एस्. टी. इत्यस्मिन् महत्त्वपूर्णानि सुधाराणि प्रस्तावितानि। संरचनात्मक-सुधारः, दरस्य तर्कसङ्गतीकरणं, जीवनस्य सुगमता च इति त्रयः स्तम्भेषु संस्काराः केन्द्रीकृताः भविष्यन्ति। केन्द्रीय-वित्त-मन्त्रालयः सर्वसमावेशक-विकासाय, सम्पूर्णे देशे व्यापारस्य सुगमतां वर्धयितुं च जी. एस्. टी. इतीदं सरलतया, स्थिरतया, पारदर्शकतया च करव्यवस्थायां परिवर्तयितुं स्वस्य प्रतिबद्धतां पुनः दृढीकृतवान्।

---

<u>सेमीकॉन प्रधानमन्त्री</u>

सेमीकॉन-इण्डिया-पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य द्वितीये दिने प्रधानमन्त्रिणा नरेन्द्र-मोदिना अद्य नव-दिल्ल्याः यशोभूमौ सेमिकण्डक्टर-क्षेत्रस्य विशेषज्ञैः सह संवादः कृतः। तेन प्रदर्शनीनां अवलोकनं कृत्वा सेमिकण्डक्टर इत्यनेन सम्बद्धानां विविधानां उत्पादानां परियोजनानाञ्च अवलोकनं विहितम्।

अस्मिन् अवसरे सूचना-प्रोद्योगिकी-मन्त्री अश्विनी-वैष्णवः उपस्थितः आसीत्। श्रीमोदी अद्य मध्याह्ने सेमीकॉन-इण्डिया इत्यस्य गोलमेज़-सम्मेलने अपि भागं अभजत्।

सीईओ-गोलमेज़-सम्मेलने विश्वस्य उद्योग-जगतः महान्तः नेतारः समायाताः। त्रिदिनात्मकस्य अस्य सम्मेलस्य उद्घाटनं ह्यः प्रधानमन्त्रिणा मोदिना कृतम्।

अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी अद्य केन्द्रीय-मन्त्रिणा अश्विनी-वैष्णवेन लिखितं एकं लेखमपि प्राकाटयत् , यस्मिन् भारतस्य रूपान्तरकारिणी सेमिकण्डक्टर-यात्रा प्रकाशिता। सः अवदत् यत् सेमीकॉन-इण्डिया-शिखर-सम्मेलनम् पञ्चविंशत्याधिक-द्विसहस्रतमं अस्याः यात्रायाः निरन्तरतायाः प्रतीकमस्ति।

---------------------------------------------

<u>विदेशमन्त्रीसम्मेलनम्</u>

विदेश-मन्त्री डा. एस्. जयशङ्करः तथा च जर्मनी-देशस्य विदेशमन्त्री जोहान् डेविड् वाडेफुल् अद्य नवदेहली-नगरे भारत-जर्मनी-सहयोगिका विषये, यूरोपीय-सङ्घेन सह सम्बन्धस्य विषये च सफलां चर्चां कृतवन्तौ। उभयपक्षौ राजनैतिकसहयोगस्य, सुरक्षायाः, रक्षायाः, प्रकृतेः, भाविप्रौद्योगिकीनां विषये अपि च जनानां मध्ये आदानप्रदानविषये अपि मतानां आदानप्रदानम् अकुर्वन्। जर्मन्-देशस्य समकक्षीयेन सह संयुक्त-वार्ताहरसम्मेलनं सम्बोधयन् डा. जयशङ्करः अवदत् यत् उभौ पक्षौ क्षेत्रीय-वैश्विक-बहुपक्षीय-विषयेषु विचाराणाम् आदानंप्रदानम् च अकुरुताम्।

डा. जयशङ्करः उक्तवान् यत् सः उभयोः देशयोः मध्ये व्यापारर्मभिलक्ष्य आशान्वितः अस्ति भारत-जर्मनी-देशयोः मध्ये द्वैपाक्षिकव्यापारः गतवर्षे प्रायः 50 बिलियन् इति यूरोमुद्राम् यावत् अभवत् इति अपि अधोरेखितवान्।

भारत-जर्मनी-देशयोः वैज्ञानिकसहयोगस्य 50 वर्षाणि पूरितानि इति, डा. जयशङ्करः एतस्या सहभागित्वस्य वर्धयितुं, उद्योगेन सह इतोऽपि निकटतया सम्बद्धस्य आवश्यकतायाः विषये अवधानं दत्तवान्। सः द्वयोः देशयोः मध्ये सक्रियतया अन्तरिक्षसहयोगस्य अन्वेषणस्य महत्त्वम् अपि अधोरेखितवान्। डा. जयशङ्करः अवदत् यत् उभयपक्षयोः मध्ये चर्चासु हरित-हैड्रोजन्, हरित-ऊर्जा, जैव-इन्धनम् इत्यादीनि क्षेत्राणि अपि अन्तर्भवन्ति इति। डा. जयशङ्करः अपि अवदत् यत् छात्राणां आदानप्रदानम् अधिकं प्रवर्धयितुं लघु-विद्यालय-महाविद्यालय-भ्रमणार्थं निःशुल्क-वीसा-विषये अपि पक्षद्वयम् सहमतम् अभवत् इति। सः इतोऽपि अधोरेखितवान् यत् व्यूहात्मकस्वायत्तायुक्तं बहुध्रुवीय-विश्वं अद्यतनस्य वैश्विकप्रतिसन्धिं प्रत्युत्तरं दातुं सर्वाधिकं उपयुक्तम् अस्ति इति।

-------------------------------------------

## भाजपा-पवन-खेड़ा

भारतीयजनतापार्टीति दलेन अद्य कांग्रेस-नेता पवन-खेड़ा इत्येषः द्वयोः मतदानपरिचय-पत्रयोः संस्थापनार्थं आक्षिप्तः। नव-दिल्ल्यां भाजपा-मुख्यालये वार्ताहरान् विज्ञापयन्त्या शाज़िया इल्मी इत्यनया उक्तं यत् श्री-खेड़ा इत्यस्य सहैव तस्य पत्न्याश्च पार्श्वे द्वे मतदानपरिचय-पत्रे स्तः। सा एतदपि अवदत् यत् कांग्रेस-नेता राहुल-गान्धी देशस्य सामान्य-जनानामुपरि दोषान् आरोपयति किन्तु स्वस्य मूल-दलस्य विषये मौनं धारयति। वार्ताहरान् सम्बोधयन्ती सा अग्रे अवदत् यत् कांग्रेस-दलं लोकतन्त्रस्य किञ्चिदपि चिन्तां न करोति। सा दोषिणः विरुध्य उचित-कार्याचरणाय निर्वाचन-आयोगात् उच्च-स्तरीय-अन्वेषणार्थं याचनामपि विहितवती ।

-------------------------------------------

## गृहमन्त्री आपरेशन् ब्लैक्

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य छत्तीसगढस्य कर्रेगुट्टलु-पर्वते आपरेशन्-ब्लैक्-फ़ारेस्ट् इत्यस्य सफलताम् अभिलक्ष्य सी. आर्. पी. एफ्., छत्तीसगढ-आरक्षकान्, डी. आर्. जी., कोब्रा-कार्मिकान् च सम्मानयत्।

छत्तीसगढ-तेलङ्गाना-सीमायां कुर्रगुट्टलु-पर्वतेषु आयोजिते नक्सल्-विरोधे अस्मिन् बृहत्-अभियानेन सुरक्षासैनिकाः 31 कुख्यातान् नक्सल्-जनान् व्यापादितवन्त: । अस्मिन् वर्षे एप्रिल्-मासस्य 21 दिनाङ्कात् मे-मासस्य 11 दिनाङ्कपर्यन्तं नक्सल्-विरोधी-अभियानम् अभवत्। अस्मिन् अवसरे राज्यस्य मुख्यमन्त्री विष्णुदेव साई, उपमुख्यमन्त्री विजयशर्मा च उपस्थिताः आसन्।

---------------------------------------------

__हिमाचलप्रदेशे कालवृष्टिः__

हिमाचल-प्रदेशे निरन्तरं अतिवृष्ट्या जनजीवनम् अतिशयेन प्रभावितम्। अस्माकं वार्ताहारैः संसूचितं यत् राज्ये वर्षा-सम्बद्धेषु घटनासु मृतानां संख्या एकचत्वारिंशत्याधिक- त्रिशतं यावत् जाता। ऋतु-विभागस्य अनुसारं राज्ये अद्यापि सामान्यात् द्विचत्वारिंशत्- प्रतिशताधिकं वर्षा जाता। मण्डी-जङ्गमबाग-जनपदयोः ह्यः रात्रौ द्वौ गृहौ विनष्टौ। अस्यां दुर्घटनायाम् इदानीं यावत् सप्त शवाः प्राप्ताः।

---------------------------------------------

__जम्मू-कश्मीर्-प्रदेशे__

जम्मू-कश्मीर्-प्रदेशे गतरात्र्याः आरभ्य जम्मू-प्रदेशस्य विभिन्नेषु भागेषु प्रचण्डवृष्ट्या विनाशः अभवत्, जलप्लावनम्, यातायातस्य सङ्कीर्णता, दैनिकयात्रिकाणां कष्टानि च अभवन्।

---------------------------------------------

__हाकी__

हाकीक्रीडायाम् अद्य भारतं साउथकोरियां विरुध्य पुरुषाणाम् एशियाकपप्रतियोगितायाः सुपर् फ़ोर् इत्यस्मिन् क्रीडायां क्रीडिष्यति।

।। इति वार्ता:।।